International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(4): 80-84
© 2017 IJSR
www.anantaajournal.com
Received: 15-05-2017
Accepted: 16-06-2017

**सेख-साविर-आलि**
सहायकाध्यापकः, संस्कृतसंकाये
पश्चिमवङ्गराज्यविश्वविद्यालये

**Correspondence**
**सेख-साविर-आलि**
सहायकाध्यापकः, संस्कृतसंकाये
पश्चिमवङ्गराज्यविश्वविद्यालये

# सौगतमतमर्दने शङ्करवैशिष्ट्यम्

**सेख-साविर-आलि**

अत्र कथंकारं सौगतमतं विमर्दितं शङ्करेणाचार्येण तद्विमर्दनविधौ च शङ्करवैशिष्ट्यं किमित्यपि प्रतिपाद्यद्वितयमस्ति। सर्वदर्शनसंग्रहे सायणमाधवाचार्यविरचिते बौद्धदर्शने सदृष्दान्तं तथागतसम्प्रदायविभाजनं व्यधायि। "सूर्योऽस्तं गतः" इति उच्यमाने ब्राह्मणः सन्ध्याह्निकसम्पिपादयिषया गृहं गतः, स्तेनश्च स्तेयार्थं स्वगृहं प्राप्तः, गोपालकश्च गवां गृहे प्रत्यावर्तनाय क्षेत्रं प्रस्थितः – इति त्रिविधा प्रवृत्तिरेकस्मादेव वाक्याद् दृश्यते भिन्नार्थावगमादेव। एवमेवैकस्मादेव सुगतोपदेशाद् भिन्नार्थावगमाच्चतुःसम्प्रदायाः समभूवन्। तत्र वैभाषिकाः सौत्रान्तिका योगाचारा माध्यमिकाश्चेति चत्वारः सम्प्रदायाः। तत्र वैभाषिकाः सौत्रान्तिकाश्च बाह्याभ्यन्तरमुभयविधमेवार्थमङ्गीकुर्वन्तीति ते सर्वास्तिवादिन इत्युच्यन्ते। योगाचाराः केवलमाभ्यन्तरमेवार्थं विज्ञानात्मरूपमातिष्ठमाना विज्ञानवादिन इत्युच्यन्ते। एवमेवैकमपि पदार्थं स्वतन्त्रत्वेनानङ्गीकुर्वाणा माध्यमिकाः शून्यवादिन इति व्यपदिश्यन्ते। तदेतत् सौगतमतचतुष्टयं शाङ्करभाष्ये द्वितीयेऽध्याये समुदायाधिकरणेऽभावाधिकरणे च प्रतिपादितम्।

**सर्वास्तिवादिमतमर्दनम्:** तेषां सर्वास्तिवादिनां बाह्यमान्तरं चोभयविधमेव वस्तु वसति वसुनि। भूतं भौतिकं चित्तं चैत्तं च वर्तते। पृथिवीधात्वादयः भूतपदार्थाः। पृथिवी खरस्वभावा। आपः स्नेहस्वभावाः। अग्निरुष्णस्वभावः। वायुरीरणस्वभावः (इरणं- प्रेरणम्)। भौतिकानि च रूपरसगन्धादीनि। चतुष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरणस्वभावास्ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते।
एवं चित्तचैत्ताश्च पदार्थाः के? तदुच्यते रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः स्कन्धाः। रूप्यन्ते एभिरिति रूप्यन्ते इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धपदवाच्यानि। विज्ञानस्कन्धोऽहमित्याकारकः आलयविज्ञानप्रवाहः। वेदनास्कन्धो या प्रियाप्रियानुभवविषयस्पर्शे सुखदुःखतद्रहितविशेषावस्था चित्तस्य जायते। संज्ञास्कन्धः सविकल्पप्रत्ययः संज्ञासंसर्गयोग्यप्रतिभासः, यथा डित्थः कुण्डली गौरो ब्राह्मणः गच्छतीत्येवंजातीयकः। संस्कारस्कन्धो रागातयः क्लेशा उपक्लेशाश्च मदमानादयः धर्माधर्मौ चेति। तदेतेषां समुदायः पञ्चस्कन्धी। तत्र विज्ञानस्कन्धः चित्तमात्मा वेति गीयते। अन्ये चत्वारः स्कन्धाः चैत्ताः। ततश्च उभयविधः संघातः समुदायः अस्ति- बाह्यः आभ्यन्तरश्चेति। अणुहेतुकश्च भूतभौतिकसंहतिरूपः स्कन्धहेतुकश्च पञ्चस्कन्धीरूपः।

तदेतत् प्रतिविधीयते अद्वितिभिः उभयविधस्यैव चाध्यात्मिकस्य समुदायत्वेऽभिप्रेयमाणे तत्र समुदायत्वस्यैवाप्राप्तिः। कथम्? शाङ्करभाष्ये भाषितम् – "समुदायिनामचेतनत्वात्" इति। अत्रायमाशयो भामतीटीकायामाविष्कृतः – "चेतनो हि कुलालादिः सर्वं मृद्दण्डाद्युपसंहृत्य समुदायात्मकं घटमारचयन् दृष्टः। न ह्यसति मृद्दण्डादिव्यापारिणि विदुषि कुलाले स्वयमचेतना मृद्दण्डादयो व्यापृत्य जातु घटमारचयन्ति। न चासति कुविन्दे तन्तुवेमादयः पटं वयन्ते। तस्मात् कार्योत्पादस्तदनुगुणसमवधानाधीनस्तदभावे न भवति। कार्योत्पादानुगुणं च कारणसमवधानं चेतनप्रेक्षाधीनम्। असत्यां चेतनप्रेक्षायां न भवितुमुत्सहत इति कार्योत्पत्तिश्चेतनप्रेक्षाधीनत्वव्याप्त्या व्यापकविरुद्धोपलब्ध्या चेतनानधिष्ठितेभ्यः कारणेभ्यो व्यावर्तमाना चेतनाधिष्ठितत्व एवावतिष्ठत इति प्रतिबन्धसिद्धिः" इति।

यद्युच्यते अस्तु अद्धा चेतनाधीनैव कार्योत्पत्तिः, तच्चेतनं च चित्तमेव। अत्रेदमुत्तरं यत् संघाते देहाकारे जाते विज्ञानमुत्पद्यते, विज्ञाने जाते संघात इत्यन्योन्याश्रयदोषप्रसङ्गः। तथा चोदाहरणं काशिकायां काशितम् – "नौर्नावि बद्ध्वा नेतरत्राणाय भवति" इति। न च क्षणिकविज्ञानादन्यः कश्चन जीव ईश्वरो वा त्वयाऽभ्युपगम्यते यः संघातकर्ता भवेत्। न च कर्तारमनपेक्ष्य अणवः स्कन्धाश्च स्वयमेव संघातार्थं प्रवर्तन्त इति वाच्यम्। अनिर्मोक्षप्रसङ्गात्। यदुच्यते आलयविज्ञानसन्तान एव सहन्ता इति चेत्? अत्रोच्यते तत्रापि प्रश्नः – यः सन्तानः स च किं सन्तानिभ्योऽन्यः अनन्यो वा? आद्येऽपि प्रश्नः – स च स्थिरः क्षणिको वा? तत्र नाद्य आदर्तव्यः, अस्मदिष्टनित्यात्मवादप्रसङ्गात्। नान्त्यः रम्यः, क्षणिकस्य जन्मातिरिक्तव्यापारस्याभावात्। परमाण्वादिमेलनार्थं प्रवृत्तिरनुपपन्ना, क्षणिकत्वव्याघातात्। न च द्वितीयः पक्ष आदर्तव्यः, सन्तानस्य सन्तानितः अनन्यत्वे सन्तानिनां क्षणिकत्वेन तदात्मभूतस्य सन्तानस्यापि क्षणिकत्वात् परमाणूनां मेलनं तैः कर्तुमशक्यत्वात्। ततश्च समुदायानुपपत्तिः समुदायानुपपत्तौ च तदाश्रया लोकयात्रापि लुप्येत इति दोषः। तदेतत् सूत्रम् – "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" (२।२।१७) इति।

ननु संघातं प्रति अविद्यैव कारणमस्तु इति संघातसिद्धिः। तथाच बौद्धमतं वर्णितमादौ – "यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते, तथाप्यविद्यादीनामितरेतर-कारणत्वादुपपद्यते लोकयात्रा। तस्यां चोत्पद्यमानायां न किञ्चिदपरमपेक्षितव्यमस्ति। ते चाविद्यादयोऽविद्या संस्कारो विज्ञानं नामरूपं षडायतनं स्पर्शो वेदना तृष्णा उपादानं भवो जातिर्जरा मरणं शोकः परिवेदना दुःखं दुर्मनस्तेत्येवंजातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षेपेण निर्दिष्टाः क्वचित्प्रपञ्चिताः। सर्वेषामपि अयमविद्यादि-कलापोऽप्रत्याख्येयः। तदेवमविद्यादिकलापे परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदहर्निशमावर्तमानेऽर्थाक्षिप्त उपपन्नः संघात इति" (२।२।१९) इति।

तदेतदप्यरमणीयम्। तस्या उत्पत्तिमात्रनिमित्तत्वेऽपि संघातं प्रति निमित्तत्वाभावात् (उपादानत्वायोगात्)। अत्रायमाशयः संघातं प्रति अविद्यादीनां गमकत्वम् वा उत्पादकत्वं वा ? आद्ये संघातस्य उत्पादकत्वं किञ्चिद्वाच्यम्। द्वितीये पक्षे च अन्योन्याश्रयः दोषः स्यात्। संघातस्य अविद्यादीनां चोत्पत्तौ अन्योन्याश्रयः स्यादिति कथमिति" रत्नप्रभाटीकायामाटीकितम्। शाङ्करभाष्ये च भाषितम् – "अविद्यादय एव संघातस्य निमित्तम्" इति कथं तमेवाश्रित्य आत्मानं लभमानास्तस्यैव निमित्तानि स्युः" इति। तथाच सूत्रितम् – "इतरेतरप्रत्ययत्वादिति चेन्न। उत्पत्तिमात्रनिमित्तत्वात्" (२।२।१९) इति।

**अथ विज्ञानवादिमतमर्दनम्:** पूर्वं "समुदाय उभयहेतुके तदप्राप्तिः" इत्यादिभिः सर्वास्तिवादिनः समुदायवादिनः निराकृताः। केचन विनेया वाढमेव निरसनीया बाह्यार्थवादिनः। बाह्यार्थे तथागतानां तात्पर्याभावाद्विज्ञानैकवस्तुनि तात्पर्यसत्त्वाच्च तेषां विज्ञानैकस्कन्धवाद एवाभिप्रेतः।

ननु विज्ञानैकपदार्थसत्त्वे बाह्यस्यार्थस्याभावे प्रमाणप्रमेयफलव्यवहारः कथमुपपद्येत? अत्रोच्यते सत्यपि बाह्येऽर्थे बुद्ध्यारोहमन्तरेण प्रमाणादिव्यवहारस्यानवतारादन्तःस्थ एवायं सर्वव्यवहारः। न च विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति। तथाहि बाह्योऽर्थः परमाणुरूपः तत्समुहः स्तम्भादिरूपो वा? न तावदाद्यः, परमाणूनामतीन्द्रियत्वेन स्तम्भादिप्रत्ययपरिच्छेद्यत्वाभावात्। नापि अन्यः, परमाणुतस्तेषामभेदे परमाणुपक्षे यावन्तो दोषास्ते पुनरत्रापि आपतेयुः। एवञ्च परमाणुतस्तेषां भेदपक्षे तत्रापि प्रश्नः – परमाणुभिः सह समुहस्य स्तम्भादेः सम्बन्धोऽस्ति न वा ? सम्बन्धश्चेत् स च तादात्म्यं समवायो वा? नाद्यः परमाणुतो भेदं साधयतः भवतः परमाणुनाऽभेदस्य स्वीकारे स्वव्याघातापत्तेः। न च द्वितीयः समवायस्य वैशेषिकाधिकरणे एभिरेव निराकृतत्वात्। यदि च सम्बन्धो नास्त्येवेत्युच्येत, तदा कथं तर्हि तयोरुपादानोपादेयभावः संगच्छतां नाम? ततश्च बाह्यं नात्मभावप्रतिष्ठां नोपपद्यते। नन्वसति बाह्ये कथं तत्प्रतीतिर्घटत इति चेन्न। वासनावैचित्र्यादेव। तदुक्तं शाङ्करभाष्ये "अनादौ हि संसारे बीजाङ्कुरवत् विज्ञानानां वासनानां च अन्योन्यनिमित्तनैमित्तिकभावेन वैचित्र्यं न विप्रतिषिध्यते। अपि च अन्वयव्यतिरेकाभ्यां वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते। स्वप्नादिषु अन्तरेणाप्यर्थं

वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्यामपि आवाभ्यामभ्युपगम्यमानत्वात्, अन्तरेण तु वासनामर्थनिमित्तस्य ज्ञानवैचित्र्यस्य मयाऽभ्युपगम्यमानत्वात्। तस्मादप्यभावो बाह्यार्थस्य इति" इति।

अनुमानतोऽपि बाह्यप्रत्याख्यानं सम्भवति। तथाच रत्नप्रभायां प्रकाशितम् – "जाग्रद्विज्ञानं न विज्ञानत्वात् स्वप्नादिबाह्यालम्बनं ज्ञानवत्" इति।

अत्रेदं प्रतिविधीयते यत्,

**प्रथमतः** किं बाह्यार्थस्यानुपलब्धेरभावः साध्यते ? तदेतद्वक्तुं न शक्यते। न हि बाह्यार्थो नोपलभ्यत इति। उपलभ्यमानो हि बाह्यार्थो घटः पटः कुड्यमिति। तच्च शङ्कराचार्येण सोदाहरणं प्रपञ्चितम् – "यथा हि कश्चिद् भुञ्जानो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात्- नाहं भुञ्जे न वा तृप्यामीति, तद्वदिन्द्रियसन्निकर्षेण स्वयमुपलभमान एव बाह्यमर्थं, नाहमुपलभे। न च सोऽस्तीति ब्रुवन् कथमुपादेयवचनः स्यात् ? (२।२।२८) इति।

**द्वितीयतः** किञ्च विज्ञानात् भेदेनानुपलब्धेर्विज्ञानातिरिक्तो बाह्योऽर्थो नास्तीति भदन्तामाभिप्रायः ? न हि कश्चिदुपलब्धिमेव स्तम्भः कुड्यं वेति ब्रवीति। किन्तु उपलब्धिविषयत्वेनैव स्तम्भकुड्यादीनां व्यवहारः भवति। केषामेवमुपलब्धिः ? अखण्डपाखण्डपण्डितपुंसामतो लोकोऽपि प्रमाणमिति बाह्यार्थो वर्तते किल। तथाच शङ्कराचार्येण सोदाहरणं तिरस्कुर्वाणेनोदितम् – "वाढमेवं ब्रवीषि निरङ्कुशत्वात्ते तुण्डस्य, न तु युक्त्युपेतं ब्रवीषि" इति।

**तृतीयतः** यच्चेदं भदन्तेर्भणितम् – "यदन्तेर्ज्ञेयरूपं तद्बहिर्वद्भासते" इति, तत्र असति बाह्येऽर्थे कथं तदुपमानीकर्तुं शक्यते ? बाह्यार्थस्यात्यन्तासत्त्वे प्रत्यक्षोपलम्भायोगाद् दृष्टान्तत्वासम्भवाच्च बहिर्वच्छब्दो न स्यात्। अतएव सर्वलोकप्रसिद्धां बहिराभासमानां संविदं प्रतिलभमानाः प्रत्याख्यातुकामाश्च बाह्यमर्थं बहिर्वदिति वत्कारं कुर्वन्ति। अतो बाह्यं नात्यन्तमसत् खपुष्पादिवत्। कथम् ? प्रतीतेः। नापि अत्यन्तं सत् तत्त्वज्ञानेन बाधात्। ततश्च सोदाहरणं भदन्तमतं मर्दितम् – "न हि विष्णुमित्रो बन्ध्यापुत्रवदभासत इति युक्तमभ्युपगन्तुं, न तु बहिर्वदवभासत इति" इति।

**चतुर्थतः** विज्ञानवादिभिर्यः सहोपलम्भनियमः प्रत्ययविषयोरभेदहेतुक उपपादितः, स च न सम्भवति। स च नियमो न प्रत्ययविषययोरभेदहेतुकः। अपि तु प्रत्ययविषययोरुपादानोपादेयभावहेतुकः। यथा हि चाक्षुषद्रव्यरूपस्यालोकोपलम्भनियतोपलब्धिकत्वेऽपि नालोकाभेदः तथा अर्थस्य न ज्ञानाभेदः।

उपपादितञ्चैतत् "वैधर्म्याच्च न स्वप्नादिवत्" (२।२।२९) इति सूत्रव्याख्यायाम् – "अत्रोच्यते – न स्वप्नादिप्रत्यवत् जाग्रत्प्रत्यया भवितुमर्हति। कस्मात् ? वैधर्म्यात्। वैधर्म्यं हि भवति स्वप्नजागरितायाः। किं पुनर्वैधर्म्यम् ? बाधाबाधौ इति ब्रुमः। बाध्यते हि भवति स्वप्नोलब्धं वस्तु प्रतिबुद्धस्य मिथ्या मयोपलब्धो महाजनसमागम इति ---- न चैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्याञ्चिदप्यवस्थायां बाध्यते। अपि च स्मृतिरेषा यत् स्वप्नदर्शनम् उपलब्धिस्तु जागरितदर्शनम्" (२।२।२९) इति।

**शून्यवादिमतम्:** शङ्कराचार्यैर्बाह्यार्थवादिनां वाज्ञानैकवादिनां च वादः व्युदासतात्पर्येण भाष्यं भाषितम्। न च तदतिरिक्ततया शून्यवादविमर्दने वादरायणाचार्यैः सूत्रमतिरिक्तं नोपरचितम्। तत्र शङ्कराचार्याणामयमभिप्रायः – "शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते" इति (२.२.३१) इति। एतेनैभिरेवार्थैः शून्यवादोऽपि निराकृत इति मन्तव्यम्। तच्च रत्नप्रभायां सूत्रयोजनं दर्शितम्– "ज्ञानज्ञेयात्मकस्य सर्वस्य सत्त्वासत्त्वाभ्यां विचारासहत्वात् शून्यताऽवशिष्यत इति माध्यमिकपक्षस्यापि मानमूलत्वमाशङ्क्य सूत्रकारः किमिति न निराचकार इत्यत आह – 'शून्येति' इति।

वस्तुतः "सर्वप्रमाणविप्रतिषिद्ध" इत्यनेनापि हेतुविशेष उदीरितः। तथाहि "सर्वं शून्यम्" इति प्रतिज्ञातार्थः सन् असन् वा ? आद्ये सर्वं शून्यमित्यस्य सत्त्वे सर्वस्य शून्यत्वविरोधेन स्वसिद्धान्तविरोधः। द्वितीये 'सर्वं शून्यमि'त्यस्य असत्यत्वे सर्वस्य सत्यत्वापत्तिः। अनुरूपमेव वेदान्तकौस्तूभप्रभाटीकायामाटीकितम्। "सत्यत्वे प्रतिज्ञाहानिप्रसङ्गात्" (२।२।३२) इति।

किञ्च यैरेव सूत्रैर्विज्ञानवादिमतमर्दनमकारि वादरायणाचार्यैः, तैरेव सूत्रैर्युगपच्छून्यवादिमतमार्दीति व्याख्यानभेदात् प्रतीयते। तथाहि

**प्रथमतः** यथा विज्ञानवादिमतविमर्दनवेलायां "नाभाव उपलब्धेः" (२।२।२८) इति सूत्रव्याख्यायामुक्तम् बाह्याभावः नोपपद्यते। कथम् ? उपलब्धेः। तद्वदत्र शून्यवादिवादव्युदसने उच्यते तस्यैव व्याख्यायां ज्ञानार्थयोर्न अभावः प्रमाणत उपलब्धेः।

**द्वितीयतः** ननु जाग्रत्स्वप्नौ ज्ञानार्थशून्यौ अवस्थाविशेषत्वात् सुषुप्तिवदित्यत आह – "वैधर्म्याच्च न स्वप्नादिवत् --- स्वप्नादिषु यथा असदपि वस्तु भासते, न तथा जाग्रति

भासमानानां वस्तूनामत्यन्तमभावो युज्यत इति वैधर्म्यवशादेव बाह्याभ्यान्तरपदार्थसत्त्वमास्थेयम्" (रत्नप्रभायाम् २।२।३१) इति।

**तृतीयतः** "किञ्च निरधिष्ठाननिषेधायोगादधिष्ठानमेव तत्त्वं वाच्यम्। तस्य त्वन्मते न भावः --- यद्भाति तन्नाऽसदित्युत्सर्गतः प्रपञ्चस्य न शून्यत्वम्, बाधाभावादित्यर्थः। ---- न च सत्त्वासत्त्वाभ्यां विचारासहत्वादसत्त्वम् मिथ्यात्वसम्धवादिति भावः" (रत्नप्रभायाम् २।२।३१) इति।

**चतुर्थतः** क्षणिकत्वोपदेशाच्च न शून्यवादः युक्तः। तथाच सूत्रम् – "क्षणिकत्वाच्च" (२।२।३१) इति तदेतत् सूत्रं 'क्षणिकत्वोपदेशाच्च' इति पठनीयम्। शून्यत्वविरुद्धक्षणिकत्वोपदेशादसङ्गतप्रलापी सुगत इत्यर्थः" इति।

**सौगतमतमर्दने शङ्करवैशिष्ट्यम्:** अत्रेदमवधेयं यत् सौगतमतं यथाऽद्वैतिनां सजातीया तथा विजातीया अपि मर्दितवन्त इति तेषां मर्दनशैलीतः शाङ्करमर्दनशैलीभेदो द्रष्टव्यः।

**प्रथमतः** तथाहि विगोत्रा नैयायिका अपि सौगतमतं चुर्णितवन्तः। न्यायसूत्रभाष्ये वात्सायनाचार्यैर्बौद्धाधिकारे (आत्मतत्त्वविवेके) उदयनाचार्यैः सुगतमतं निराकृतं वेदितव्यम्। किन्तु तेषां विशेषतो बौद्धाधिकारकृतामुदयनाचार्याणां युक्तिपंक्ती नानायासगम्ये। ततोऽपेक्षया शाङ्करभाष्ययुक्तिपंक्ती सुतरामेवानायासगम्य इति भेदो द्रष्टव्यः।

**द्वितीयतः** उदाहरणप्राबल्यादेव दार्शनिकं गम्भीरं तत्त्वं सुबोधं संवृत्तम्। तथाहि दिङ्मात्रमुदाहरणं - "यथा हि कश्चिद् भुञ्जानो भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात् – नाहं भुञ्जे न वा तृप्यामीति, तद्वदिन्द्रियसन्निकर्षेण स्वयमुपलभमान एव बाह्यमर्थं नाहमुपलभे। न च सोऽस्तीति ब्रूवन् कथमुपादेयवचनः स्यात् ?" (२।२।२८) इति। " न हि विष्णुमित्रो बन्ध्यापुत्रवदवभासत इति युक्तमभ्युपगन्तुं, न तु बहिर्वदवभासत इति" इत्येतत्सर्वमुदितपूर्वम्। न च अन्यत्र न्यायभाष्यादौ ग्रन्थे एवम्प्रकारप्रचुरोदाहरणद्वारकं युक्तिर्नोपपादिता इति ततोऽपि शाङ्करभाष्यस्य सौगतमतविमर्दने उत्कर्षो द्रष्टव्यः।

**तृतीयतः** अद्वैतिनां वेदान्तप्रस्थानानुयायित्वेन द्वैताद्वैतिनां निम्बार्काचार्यप्रमुखानां सजातीयत्वं द्रष्टव्यम्। तैरपि वेदान्तकुसुमानि तदीयभाष्यादिषु व्याख्यानतः तत्सुगन्धो विप्रकटितः। किन्तु ततोऽपि किञ्चिद्भेदो द्रष्टव्यः। तथाहि "सर्वथानुपपत्तेश्च" (२।२।३२) इति सूत्रस्य व्याख्यायां वेदान्तकौस्तुभटीकायामाटीकितम् – "शून्यवादस्य सर्वथानुपपत्तेश्च अनुपपन्नं सर्वं शून्यमिति दर्शनम्। प्रतिवादिभ्यां सर्वस्य जगतः सत्यत्वेनोपलम्भात्। शून्यत्वे प्रमाणाभावाच्च। क्षणिकत्ववादिभावप्रतिपादकबुद्धागमविरोधाच्च" इति । अत्रेदमवधेयं यत् यत्र शङ्कराचार्येण 'जगतः उपलब्धेः न शून्यत्वं तिष्ठती'ति व्याख्यातम्, तत्र एभिराचार्यैः "जगतः सत्यत्वेन उपलम्भात्" इति व्याख्यातम्। सत्यत्वप्रवेशाप्रवेशाभ्यां तयोर्भेदो द्रष्टव्यः। वस्तुतस्तु जगतः सत्यत्वं कथमप्यद्वैतिभिर्विवर्तवादिभिरङ्गीकर्तुं शक्येत। तदुक्तं –

"श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।।" इति।

किन्तु परिणामवादिभिर्द्वैताद्वैतवादिभिर्जीवस्य परमात्मांशत्वमङ्गूकुर्वद्भिर्जगतः सत्यत्वमङ्गीकरणीयमेव। रज्जौ सर्पधियि सर्पस्य मिथ्यात्वमस्तु। किन्तु सुवर्णस्य कुण्डलत्वे द्वयोरपि सत्यत्वमनिवार्यम्। ततश्च जगतः सत्यत्वे भेद एव तिष्ठेदिति। भक्तिवादिभिर्भेद एवेष्यते। तदुक्तं रामकृष्णदेवैः – "भक्ताः शर्करां चिखादिषवः प्रवर्तन्ते, न तु शर्करात्वं प्रेप्सवः प्रवर्तन्ते" इति (कथामृते)। यत्र सर्वास्तिवादिभिर्बाह्यार्थस्य सत्यत्वमङ्गीक्रीयते, तत्र विज्ञानवादिभिर्जगतोऽलीकत्वमङ्गीक्रियते, तत्र अद्वैतिभिः शङ्कराचार्यैर्जगतो न परमार्थसत्यत्वं नापि अलीकत्वं स्वीकृतं किन्तु व्यावहारिकसत्यत्वमङ्गीकृतमिति भेदः। अपि च आन्तरपदार्थविषये यत्र बौद्धा विज्ञानस्वरूपत्वमात्मानोऽङ्गीकृतवन्तः, तत्र एभिरप्यात्मनः ज्ञानस्वरूपत्वमङ्गीकृतमिति साम्यं वर्तते। तथाच श्रुतिः – "सत्यं ज्ञानमानन्दं ब्रह्म" (तैत्तिरीयोपनिषदि)। किन्तु यत्र विज्ञानात्मनः क्षणिकत्वमङ्गीकृतम्, तत्र शङ्कराचार्यैर्विज्ञानस्य नित्यत्वमङ्गीकृतम्, अङ्गीकार्यमेव तत् स्मृतिभङ्गकृतहानाकृताभ्यागमादिदोषवारणाय। वस्तुतः परवर्तिनि काले वसुबन्धुभिरपि आचार्यैर्विज्ञप्तिमात्रतासिद्धौ त्रिशिकाप्रकरणे विज्ञानधातोः नित्यत्वमेवाङ्गीकृतमिति। तथाच उदितन्तत्र –

"स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः।

सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुने।।"(३०) इति। ततश्च विज्ञानवादकुशूलो हि अद्वैतवादाङ्कुर इत्यवशिष्यते परिशेषत इति शेमुषीजुषां हर्षवर्षो भवतुतरामिति शम्।

**ग्रन्थसूची**


1. ब्रह्मसूत्रम् (द्वितीयभागात्मकम्), महर्षिवादरायणप्रणीतं, सटीकभगवत्पादशङ्करप्रणीतशारीरकमीमांसाभाष्यभगवत्पा-दरामानन्दप्रणीतरत्नप्रभासमलङ्कृतम्, यतिवरभोलेवावासम्पादितम्, वाराणसीस्थचौखाम्बाविद्या-भवनतः प्रकाशितम् २००६ ख्रीष्टाब्दे।
2. ब्रह्मसूत्रम् (द्वितीयभागात्मकम्), महर्षिवादरायणप्रणीतं, भामतीकल्पतरुपरिमलसहितम्, श्रीकन्हैयालालजोशीसम्पादितम्, देहलीनगरीस्थितपरिमल-पाब्लिकेशन्संस्थातः प्रकाशितम् २००७ ख्रीष्टाब्दे।
3. ब्रह्मसूत्रनिम्बार्कभाष्यम् (द्वितीयभागात्मकम्), वेदान्त-कौस्तुभवेदान्तकौस्तुभप्रभा-भावदीपिका-व्याख्यात्रयोपेतम्, ड-मदनमोहन-आग्रवालसम्पादितम्, देहलीनगरस्थचौखम्बासंस्कृतप्रतिष्ठानतः प्रकाशितम् २००० ख्रीष्टाब्दे।
4. सर्वदर्शनसंग्रहः सायणमाधवीयः टिजिमणिकरसम्पादितः अभ्यङ्करटीकासहितः पुनास्थितभाण्डारकररिसर्च-इन्स्टिटिउट्-प्रतिष्ठानतः १९७८ ईशवीयवर्षे प्रकाशितः।